# Masi Masi Sankatahara Chaturthi Puja

# માસિમાસિસઙ્કટહરચતુર્થીપૂજા

## Document Information

Text title : Masi Masi Sankatahara Chaturthi Puja

File name : mAsimAsisankaTaharachaturthIpUjA.itx

Category : ganesha, pUjA

Location : doc_ganesha

Proofread by : Narendran Madathil

Description/comments : From Vighneshvara-stuti-manjari 4

Latest update : October 10, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 10, 2026

*sanskritdocuments.org*

# માસિમાસિસઙ્કટહરચતુર્થીપૂજા

દ્વાદશસ્વપિ માસેષુ પૃથઙ્નામભિરર્ચયેત્ ।
વિનાયકશ્ચૈકદન્તઃ કૃષ્ણપિઙ્ગો ગજાનનઃ ॥

લમ્બોદરો ભાલચન્દ્રો હેરમ્બો વિકટસ્તથા ।
વક્રતુણ્ડશ્ચાખુવાહો વિઘ્નરાજો ગણાધિપઃ ॥

નામ્નાં દ્વાદશભિશ્ચૈતૈઃ ગણેશં પૂજયેદ્વ્રતી ।
(ભાદ્રપદ)
ભદ્રે ! ભાદ્રપદે માસિ સઙ્કષ્ટ્યા યા ચતુર્થિકા ।
અનેકફલદા પ્રોક્તા સર્વસિદ્ધિપ્રદાયિની ॥

(અશ્વિન)
ચતુર્થી ચાશ્વિને કૃષ્ણા સઙ્કટા વ્રતમુત્તમમ્ ।
દૂર્વાહરિદ્રયોર્હોમાત્સપ્તદ્વીપવતીપતિઃ ।
(કાર્તિક)
ઊર્જ (કાર્તિક)કૃષ્ણચતુર્થ્યાં તુ સઙ્કષ્ટવ્રતમુત્તમમ્ ।
માષાન્નૈશ્ચ ઘૃતૈ ર્હોમૈઃ સર્વસિદ્ધિર્ભવેન્નૃણામ્ ॥

(માર્ગશીર્ષ)
માર્ગશીર્ષે તુ યા કૃષ્ણા ચતુર્થી સઙ્કટા ભવેત્ ।
અષ્ટૌ ચ હોમયેદ્ દ્રવ્યં વૈરી તુ વશતામિયાત્ ॥

(પૌષ)
પૌષે માસિ મહાદેવ ! વિઘ્નહન્ત્રી ચતુર્થિકા ।
તસ્યાં લમ્બોદરઃ પૂજ્યઃ પેયં ગોમૂત્રમેવ હિ ॥

(માઘ)
હવિષ્યાન્નઘૃતૈર્હોમો રાજવશ્યાર્થમેવ ચ ।
માઘમાસે ગણાધ્યક્ષં ફાલચન્દ્રં પ્રપૂજયેત્ ॥

મોદકાન્કારયેન્માતઃ તિલજાન્દશ પાર્વતિ ।
દેવાગ્રે સ્થાપયેત્પઞ્ચ પઞ્ચ વિપ્રાય કલ્પયેત્ ।
પૂજયિત્વા ચ તં વિપ્રં ભક્તિભાવેન દેવવત્ ।
દક્ષિણાં ચ યથાશક્તિ મોદકાન્પઞ્ચ દાપયેત્ ।
(ફાલ્ગુન)
ફાલ્ગુનસ્યાસિતે પક્ષે હેરમ્બાખ્યો ગણેશ્વરઃ ।
પાયસૈઃ કરવીરૈશ્ચ પુષ્પૈર્વશ્યૈશ્ચ હોમયેત્ ।
ઘૃતં ચ શર્કરા ચૈવ ભોજનં કથ્યતે બુધૈઃ ॥

(ચૈત્ર)
ચૈત્રકૃષ્ણ ચતુર્થી યા વ્રતં સઙ્કષ્ટનાશનમ્ ।
બીજપૂરૈર્ઘૃતૈ હોમૈઃ વન્ધ્યા સ્ત્રી પુત્રમાપ્નુયાત્ ॥

(વૈશાખ)
વૈશાખસ્યાસિતે પક્ષે ચતુર્થ્યાં તદ્દિને વ્રતમ્ ।
પૂજનીયો વક્રતુણ્ડો ભોજનં શતપત્રકમ્ ॥

(જ્યેષ્ઠ)
માસજ્યેષ્ઠેઽસિતે પક્ષે ગણેશસ્ય ચતુર્થિકા ।
સૌભાગ્યદાયિની દેવી પતિદા સા પ્રકીર્તિતા ॥

તસ્યામાખુરથઃ પૂજ્યો વિધિના ભક્તિચેતસા ।
ભોજનં ચ ઘૃતં દિવ્યં બ્રાહ્મણાન્ભોજયેત્તદા ॥

(આષાઢ)
પાર્થ આષાઢમાસે તુ લમ્બોદર ઇતિ સ્મૃતઃ ।
પૂજનીય ગણાધ્યક્ષઃ પૂર્વોક્તવિધિના તતઃ ॥

(શ્રાવણ)
અધિમાસ્યસિતે પક્ષે ચતુર્થ્યાં તુ વિધૂદયે ।
પૂજનીયો વિધાનેન વિઘ્નહા નૃપસત્તમ ॥

યથા ચોત્પદ્યતે શક્તિર્ભક્તિભાવેન ચાર્ચયેત્ ।
પઞ્ચામૃતેન ચ સ્નાયાત્ રક્તપુષ્પૈઃ પ્રપૂજયેત્ ।
ગન્ધધૂપૈશ્ચ નૈવેદ્યૈઃ દૂર્વાયુગ્મૈઃ સુવાસિતૈઃ ।
મોદકાન્પઞ્ચદશકાન્ ઘૃતશર્કરયા યુતાન્ ।
કૃત્વા પઞ્ચ ગણેશાય પઞ્ચ વિપ્રાય દાપયેત્ ।

કુમાર્યૈ વટકાન્દત્વા સ્વયં પઞ્ચાચ્ચ ભોજયેત્ ।
રાજન્કૃષ્ણ ચતુર્થ્યાં ચ પૂજનીયો ગણાધિપઃ ।
પઞ્ચામૃતૈઃ ષોડશભિઃ ઉપચારૈશ્ચ પૂજનમ્ ॥

રક્તૈઃ કરવીરપુષ્પૈર્નૈવેદ્યૈર્મોદકાદિભિઃ ।
રક્તપુષ્પાક્ષતૈર્દૂર્વાગ્રાભિર્નામપદૈઃ પૃથક્ ॥

વિશ્વપ્રિયાયેત્યાચમનં સ્નાનં ચ બ્રહ્મચારિણે ।
વસ્ત્રં ગણેશ્વરાયેતિ પુષ્ટિદાયેતિ ચન્દનમ્ ॥

વિનાયકાય પુષ્પાણિ ધૂપં ચોમાસુતાય ચ ।
દીપં રુદ્રપ્રિયાયેતિ નૈવેદ્યં વિઘ્નનાશિને ।
તામ્બૂલં ફલદાયેતિ ફલં સઙ્કષ્ટનાશિને ॥

તતઃ સમ્પ્રાર્થયેદ્દેવં વિઘ્નેશં તં ગણાધિપમ્ ।
સંસારપીડાવ્યથિતં ભયાર્તં ક્લેશાર્દિતં માં સુમુખ પ્રસીદ ।
ત્રાયસ્વ માં દુઃખદરિદ્રનાશન નમો નમો વિઘ્નવિનાશનાય ॥

પુષ્પાઞ્જલ્યામિમં મન્ત્રં ચન્દ્રાયાર્ઘ્યં પ્રદાપયેત્ ।
બ્રાહ્મણે ભોજનં દત્વા મોદકાન્દક્ષિણાન્વિતાન્ ।
પશ્ચાત્સ્વયં તુ ભુઞ્જીત દેવબ્રાહ્મણશેષતઃ ।
બીજાપૂરગદેક્ષુકાર્મુકરુજાચક્રાબ્જપાશોત્પલ-
વ્રીહ્યગ્રસ્વવિષાણ રત્નકલશપ્રોદ્યત્કરામ્ભોરુહઃ ।
પાયાદ્ વલ્લભયા સપદ્મકરયાશ્લિષ્ટો જ્વલદ્ભૂષયા
વિશ્વોત્પત્તિવિપત્તિસંસ્થિતિકરો વિઘ્નેશ ઇષ્ટાર્થદઃ ॥

ભૂમિશાયી જિતક્રોધો લોભદમ્ભવિવર્જિતઃ ।
પ્રતિમાસં યુતઃ કુર્યાત્ વ્રતં હેરમ્બતુષ્ટયે ॥

ઇતિ માસિમાસિસઙ્કટહરચતુર્થીપૂજા સમ્પૂર્ણા ।

Proofread by Narendran Madathil

*Masi Masi Sankatahara Chaturthi Puja*

pdf was typeset on October 10, 2026

Please send corrections to *sanskrit@cheerful.com*